# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीतृतीयवर्षम् (SEM- 5) **प्रश्नपत्रम्** – ५ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड – CC 3.5.9.** **समयः** - १० तः ०१

**दिनाङ्कः** - ०८/१२/२०१८ **सन्दर्भग्रन्थः** – काव्यमीमांसा (१,२,४,५ अध्यायाः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१) इति सूत्राण्यथैतेषां व्याख्याभाष्यं भविष्यति।
समासव्यासविन्यासः सैष शिष्यहिताय नः।।

२) यायावरीयः सङ्क्षिप्य मुनीनां मतविस्तरम्
व्याकरोत्काव्यमीमांसां कविभ्यो राजशेखरः॥

३) विद्यास्थानानां गन्तुमन्तं न शक्तो जीवेद्वर्षाणां योऽपि साग्रं सहस्रम्।
तस्मात् सङ्क्षेपादर्थसन्दोह उक्तो व्यासः सन्त्यक्तो ग्रन्थभीरुप्रियार्थम्॥

**प्रश्नः – २ एकस्य विस्तृतं व्याख्यानं कुरुत।** १०

**१) राजशेखरस्य संस्कृतसाहित्ये प्रदानं विलिख्य काव्यमीमांसायाः प्रकरणनिर्देशः यथाग्रन्थं लेख्यः।**

**२) चतुर्दशविद्यास्थानानि विलिख्य "तत्र तिस्रः कथाः भवन्ति" इति ससन्दर्भं व्याख्येयम्।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ द्वयोः ससन्दर्भं व्याख्यां कुरुत।** १०

१. प्रथयति पुरः प्रज्ञाज्योतिर्यथार्थपरिग्रहे तदनु जनयत्यूहापोहक्रियाविशदं मनः।
अभिनिविशते तस्मात्तत्वं तदेकमुखोदयं सहपरिचयो विद्यावृद्धैः क्रमादमृतायते॥

२. सारस्वतः स्वतन्त्रः स्याद्भवेदाभ्यासिको मितः।
औपदेशकविस्त्वत्र वल्गु फल्गु च जल्पति॥

३. एकस्य तिष्ठति कवेर्गृह एव काव्यमन्यस्य गच्छति सुहृद्भवनानि यावत्।
न्यस्याविदग्धवदनेषु पदानि शश्वत् कस्यापि सञ्चरति विश्वकुतूहलीव॥

**प्रश्नः – ४ एकस्य विस्तृतं व्याख्यानं कुरुत** १०

**(१) शिष्यप्रकारविषये सोदाहरणं विवरणं कृत्वा कारयित्रीभावयित्र्योः सप्रकारं विवरणं देयम्।**

**(२) "कश्चिद्वाचं रचयितुमलम्" इति सन्दर्भ्य आलोचकानां टीकाकाराणां वा विषये ग्रन्थकारस्य मतं सोदाहरणं विवेचनीयम् ।**

**तृतीयान्वितिः(Unit - 3)**

**प्रश्नः – ५ द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** १०

१) "बहुज्ञता व्युत्पत्तिः" इत्याचार्याः ।
"उचितानुचितविवेको व्युत्पत्ति" इति यायावरीयः ।

२) आवापोद्धरणे तावद्यावद्दोलायते मनः ।
पदानां स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥

३) सति वक्तरि सत्यर्थे शब्दे सति रसे सति ।
अस्ति तन्न विना येन परिस्रवति वाङ्मधु ॥

**प्रश्नः – ६ एकस्य विस्तृतं व्याख्यानं कुरुत** १०

**१) सविस्तरं कविप्रकारोपप्रकारान् विलिख्य द्वयोः सोदाहरणं विवेचनं कार्यम्**

**२) मतान्तरोल्लेखपूर्वकं पाकलक्षणं विलिख्य तद्विषये सप्रकारं सोदाहरणं विविच्यताम् ।**

**अन्वितयः १ – ३ (Unit 1 – 3)**

**प्रश्नः – ७ दशप्रश्नानाम् अतिलघूत्तराणि लिखत ।** १०

१) 'कविरहस्यम्' इति कस्य नामधेयम् ?
२) काव्यमीमांसायां कति अधिकरणानि ?
३) उपवेदाः के ?
४) कल्पस्य किं लक्षणम् ?
५) 'परक्रिया पुराकल्प' इति कस्य प्रकारौ ?
६) शिक्षालक्षणं किम् ?
७) वेदाङ्गानि कानि ?
८) (स्मृतिर्मतिः प्रज्ञा) इत्यत्र प्रज्ञायाः लक्षणं किम् ?
९) चतुर्थाध्यायारम्भे कयोः द्वयोः विषययोः निरूपणम् ?
१०) 'प्रतथयति पुरः प्रज्ञाज्योतिर्यथार्थपरिग्रहे' इति श्लोकः कस्मिन् अध्याये ?
११) राजशेखरः कां 'काव्यमातरम्' इति पदेन उल्लिखति ?
१२) कवेः अव्युत्पत्तिकृतो दोषः कया संव्रियते ?
१३) काव्यमीमांसायाः पञ्चमाध्यायस्य किं नामधेयम् ?
१४) "आत्मारामा विहितरतयो" इति कतमस्य कविप्रकारस्य उदाहरणम् ?
१५) राजशेखरः आत्मानं केन अपरेण नाम्ना ग्रन्थेऽस्मिन् उल्लिखति?

*****************